(1072) "प्रीञ् तर्पणे कान्तौ च" (IX-क्र्यादिः-1474. सक. अनि उभ.)

कान्तिः=कामना। 'प्रीङ् प्रीतौ प्रीयतेऽप्रीणात् प्रीणीते तर्पणे ञितः ॥ अणौ यौ ञित्त्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत्।' (श्लो. 19.20) इति देवः। प्रायकः-यिका, [1]प्रीणकः-णिका, पिप्रीषकः-षिका, पेप्रीयकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि क्रैयादिकक्रीणातिवत् (274) ज्ञेयानि। [2]वत्सप्रीः।

(1073) "प्रीञ् तर्पणे" (X-चुरादिः-1837. सक. सेट्. उभ.)

आधृषीयः।

'—यौ ञित्त्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत्।' (श्लो. 20) इति देवः।

[3]प्रीणकः-णिका, [4]प्रायकः-यिका, [5]पिप्रीणयिषकः-पिप्राययिषकः-षिका,
[6]प्रायकः-यिका, [7]पिप्रीषकः-षिका, [8]पेप्रीयकः-यिका;
प्रीणयिता-त्री, पिप्रीणयिषिता-त्री, प्रेता-त्री, पिप्रीषिता-त्री, पेप्रीयिता-त्री;
प्रीणयन्-न्ती, पिप्रीणयिषन्-न्ती, [9]प्रयन्[A]-न्ती, पिप्रीषन्-न्ती; —

---

1. 'धूञ्प्रीञोर्नुग् वक्तव्यः' (वा. 7-3-37) इति ण्यन्ते सर्वत्र नुगागमे णत्वे च प्रीणकः, प्रीणयिता इत्यादीनि सर्वाण्यपि रूपाणि भवन्तीति यथायथमूह्यानि।
2. वत्सान् प्रीणातीति वत्सप्रीः। क्विपि रूपमेवम्। काशिकायां (6-4-148) रूपमेतदुदाहृतम्।
3. 'धूञ्प्रीञोर्नुग् वक्तव्यः' (वा. 7-3-37) इति ण्यन्ते सर्वत्र नुगागमो भवति। एतच्चाविशेषेण ण्यन्ते सर्वत्रेति मतेन लिखितम्।
4. 'धूञ्प्रीञोः—' (वा. 7-3-37) इति नुगागमः 'धूञ्' साहचर्येण क्रैयादिकस्य प्रीणातेर्णाविवेति, हरदत्तादिमते तु नुगभावात् वृद्धौ, आयादेशे च रूपमेवम्। एवमेव तृजादिष्वपि प्राययिता-त्री इत्यादीनि रूपाणि यथायथमूह्यानि।
5. चुरादिप्रीञोऽपि नुगागमवादिनां पक्षे ण्यन्तात् सनि रूपमेवम्। हरदत्तादिमते तु पिप्राययिषकः इत्यादीनि रूपाणीति च ज्ञेयम्।
6. 'आधृषाद् वा' (ग. सू. चुरादौ) इति वचनेन णिचो वैकल्पिकत्वात्, णिजभावपक्षे शुद्धाद्रूपमेवम्।
7. णिजभावपक्षे सनि, 'एकाच उपदेशे—' (7-2-10) इतीण्निषेधे, सनः कित्त्वे, दीर्घे च रूपम्। धातोरस्य चुरादिपठितस्य सेट्त्वेऽपि णिजभावपक्षे भ्वादिपाठेऽनिट्त्वं शास्त्रवशादिति ज्ञेयम्।
8. णिजभावपक्षे शुद्धात् यङन्ते रूपमेवमिति ज्ञेयम्।
9. णिजभावपक्षे शुद्धात्, 'शेषात् कर्तरि—' (1-3-78) इति शतैव।

A. '..........स्वैरं तत्र जनान् प्रयन् विगलितश्रन्थान् कचान् ग्रन्थयन्।'

धा. का. 3. 51.